सीतायाः प्रीतये दद्यात् मण्डपादि विसृज्य च ॥
सीताप्रीतिं वाचयीत ब्राह्मणाचार्य्यभाषितैः ।
अन्येभ्योऽपि यथाशक्त्या भूयसीं दक्षिणां ददेत्॥
अतिथिभ्योऽन्नदानञ्च कर्त्तव्यं तद्दिने किल ।
सन्तोष्य सकलान् लोकान् कुटुम्बसहितो व्रती॥
विधिना पारणं कुर्य्यात् भूमिशायी च मानवः ।
तस्योपरि सदा प्रीता सीता स्यान्नात्र संशयः॥*
यद्गृहे नित्यपूज्या स्यात् प्रतिमा तत्र गौतम ।
तस्यामेवोत्सवं कुर्य्याज्जानक्याः पूजनादिकम् ॥
नित्यपूज्या न यस्य स्यात् सीतायाः प्रतिमा यदा
शालग्रामशिलायां स कुर्य्यात् सीतोत्सवं बुधः ॥
लक्ष्मीनारायणौ यस्मात्तस्यां संवसतः सदा ।
पूर्व्वोक्तविधिना सीतानवम्या उत्सवं द्विज ॥
पूजां कुर्व्वीत वै तस्याः सर्व्वां पञ्चामृतादिभिः।
तुष्येत तेन वै तस्मिन् जानकीरघुनन्दनौ ॥*॥
इत्थं निगदितं सर्व्वं जानकीजन्मनो व्रतम् ।
कुर्व्वन्तीन्द्रादयः सर्व्वे व्रतमेतदनुत्तमम् ॥
गन्धर्व्वाः किन्नरा यक्षा गुह्यकाः सिद्धचारणाः।
नागाश्च मुनयश्चापि प्रकुर्व्वन्ति व्रतं द्विज ॥
यः कुर्य्याद्व्रतमेतद्धि जानकीजन्मसम्भवम् ।
स लभेत् सकलं ब्रह्मन् पृथ्वीयात्राफलं किल ॥
तथा षोड़शदानानां फलं प्राप्नोति मानवः ।
अश्वमेधादियज्ञानां तीर्थानामपि गौतम ॥
अत्युग्रतपसां वापि वेदोक्तायुश्च विन्दति ।
गौतमेदं व्रतं तस्मादवश्यं कुरु भक्तितः ॥
नेदं वक्तुं समर्थास्ते फणीन्द्रचतुराननाः ।
कृताद्व्रतोत्तमादस्माद्दीर्घायुः प्राप्तवानहम् ।
व्रतानां नित्यमाम्नातं भक्तिदं कुर्व्वतां सताम्॥

सूत उवाच ।

मुनये गौतमायेत्थं जानकीजन्मसम्भवम् ।
व्रतञ्च व्रतमाहात्म्यं विधानं श्रुतिचोदितम् ।
जगाद सकलं व्यक्तं मार्कण्डेयो मुनीश्वरः ॥"
इत्यादि श्रीभविष्यपुराणे श्रीसीतानवमीव्रत-माहात्म्यं समाप्तम् ॥ * ॥ स्वर्गगङ्गा । इति मेदिनी ॥ सा तु भद्राश्ववर्षगङ्गा । यथा, श्रीभागवते ५ स्कन्धे । "सीता तु ब्रह्मसदनात् केशवाचलादिगिरिशिखरेभ्योऽधोऽधः प्रस्रवन्ती गन्धमादनमूर्द्धसु पतित्वान्तरेण भद्राश्वं वर्षं प्राच्यां दिशि क्षारसमुद्रमभिप्रविशति ॥" अपि च ।

मार्कण्डेय उवाच ।

"यत्र देवसभा भूता सानौ तस्य महागिरेः ।
तत्र जाता देवनदी सीताख्या वचनाद्विधेः ॥
स्नापयित्वा यथा चन्द्रं सीतातोयैर्मनोहरैः ।
चन्द्रं पपुत्र स्ववाक्यात् सर्व्वे ते त्रिदिवौकसः ॥
तदा सीताजलं चन्द्रस्नानयोगाच्च साम्प्रतम् ।
भूत्वा निपतितं तस्मिन् हृदक्ष्लोहितसंज्ञके ॥
तद्विहृदं तदा तोयं तस्मिन् सरसि निर्म्मलम् ।
तद्ददर्श स्वयं ब्रह्मा विरिञ्चं साधु तज्जलम् ॥
तद्दर्शनाज्जलात्तस्मादुत्थिता कनकोत्तमा ।
चन्द्रभागेति तन्नाम विधिश्चक्रे स्वयं ततः ।
आर्य्यार्थं सागरस्तान्तु जग्राह ब्रह्मसम्मते ॥"
इति कालिकापुराणे २२ अध्यायः ॥

लक्ष्मीः । उमा । शस्याधिदेवता । इति नानार्थध्वनिमञ्जरी ॥ मदिरा । इति राजनिर्घण्टः ॥ गङ्गास्रोतः । यथा,—

"गङ्गायान्तु भद्रसोमा महाभद्राथ पाटला ।
तस्याः स्रोतसि सीता च वङ्क्षुर्भद्रा च कीर्त्तिता
तङ्गे देऽलकनन्दापि शारिणी त्वल्पनिम्नगा ॥"
इति शब्दमाला ॥

( नदीविशेषः । इति केचित् ॥ यथा, महाभारते । ३ । १८८ । १०० ।

"गाङ्गं शतद्रुं सीताञ्च यमुनामथ कौशिकीम् ।
* * * *
एताश्चान्याश्च सरितः पृथिव्यां या नरोत्तम ।
परिक्रामन् प्रपश्यामि तस्य कुक्षौ महात्मनः ॥")

सीतापतिः, पुं, (सीतायाः पतिः ।) श्रीरामचन्द्रः । इति शब्दरत्नावली ॥

सीतायाःपतिः, पुं, ( सीतायाः पतिः । अलुक् समासः । ) श्रीरामचन्द्रः । इति शब्दरत्नावली ॥ ( यथा, रामायणटीकाकृतो मङ्गलाचरणे ।

"रामाय रामभद्राय रामचन्द्राय वेधसे ।
रघुनाथाय नाथाय सीतायाःपतये नमः ॥" )

सीतीलकः, पुं, सतीलकः । इत्यमरटीकायां रायमुकुटः ॥

सीत्कारः, पुं, (सीत् + कृ + भावे घञ् । ) मनुष्याणां गुणानुरागजशब्दः । ( यथा, आर्य्यासप्तशत्याम् । २१६ ।

"गेहिन्या चिकुरग्रहसमयसीत्कारमीलितदृशापि ।
बाला कपोलपुलकं विलोक्य निहतोऽस्मि शिरसि पदा ॥")

सीत्कृतं, क्ली, (सीत् + कृ + भावे क्तः । ) मनुष्याणां गुणानुराजगशब्दः । यथा,—

"शब्दो गुणानुरागोत्थः प्रणादः सीत्कृतं नृणाम् ॥"
इति हेमचन्द्रः ॥

सीत्यं, क्ली, (सीतया निर्वृत्तमिति । सीता + यत्) धान्यम् । इति हेमचन्द्रः ॥

सीत्यं, त्रि, ( सीतया समितम् । सीता + "नौवयोधर्म्मेति ।" ४ । ४ । ९१ । इति यत् । ) कृष्टक्षेत्रादि । इत्यमरः । २ । ९ । ८ ॥

सीद्यं, क्ली, आलस्यम् । इति भूरिप्रयोगः ॥

सीधुः, पुं, (शीधुः । पृषोदरादित्वात् शस्य सः ।) मद्यम् । इति शब्दरत्नावली ॥ ( यथा, देवीभागवते । ५ । २४ । ६० ।

"अशोकं कुरुराजानं पादघातविकाशितम् ।
वकुलं सीधुसेकेन तथा कुरुवकं कुरु ॥" )

मद्यभेदः । इत्यमरः । २।१०।४२ ॥ यथा,—

"इक्षोः पक्वैः रसैः सिद्धः सीधुः पक्वरसश्च सः ।
आमैस्तैरेव यः सीधुः स च शीतरसः स्मृतः ॥
सीधुः पक्वरसः श्रेष्ठः स्वराग्निबलवर्णकृत् ।
वातपित्तकरा हृद्यः स्नेहनो रोचनो हरेत् ॥
विबन्धमेदशोफार्शः शोफोदरकफामयान् ।
तस्मादल्पगुणः शीतरसः संलेखनः स्मृतः ॥"
इति राजनिर्घण्टः ॥

( यथा च ।

"सीधुः कषायाम्लकमाधुरो वा
सन्दीपनो भेदमलापहा च ।
आमातिसारानिलपित्तशूल-
श्लेष्मामयार्शोग्रहणीगदघ्नः ॥"

इति हारीते प्रथमे स्थाने ११ अध्यायः ॥ )

सीधुगन्धः, पुं, (सीधोरिव गन्धो यस्य ।) वकुलः । इति शब्दरत्नावली ॥

सीधुपुष्पः, पुं, (सिधुवत् गन्धयुक्तं पुष्पं यस्य ।) कदम्बः । वकुलः । इति राजनिर्घण्टः ॥

सीधुपुष्पी, स्त्री, (सीधुवत् गन्धयुक्तं पुष्पं यस्याः । ङीष् । ) धातकी । इति राजनिर्घण्टः ॥ ( धातकीशब्देऽस्या विवरणं ज्ञातव्यम् ॥ )

सीधुरसः, पुं, ( सीधोरिव रसो यत्र । ) आम्रवृक्षः । इति राजनिर्घण्टः ॥

सीधुसंज्ञः, पुं, ( सीधोः संज्ञा संज्ञा यस्य । ) वकुलवृक्षः । इति राजनिर्घण्टः ॥

सीध्रं, क्ली, अपानम् । इति केचित् ॥

सीपः, पुं, तर्पणाद्यर्थजलपात्रम् । कोषा इति भाषा । यथा,—

"वस्तुतस्तु अत्रानुद्धृतस्य चेपासम्भवात् उद्धृतपदं हस्तादन्येन सीपादिनोद्धृतपरम् । तेन सीपादियुक्तकरतर्पणे तत्रैव जले तिलान् मिश्रयेत् ।" इति गोपालन्यायपञ्चाननकृतविचारनिर्णयः ॥

सीमन्तः, पुं, ( सीम्नोऽन्तः । शकन्ध्वादित्वात् साधुः । ) केशेषु वर्त्म । इति हेमचन्द्रः ॥ सिँति इति भाषा॥(यथा महाभारते ।१।४४।२

"अपश्यन्त तथा यान्तमाकाशे नागमुत्तमम् ।
सीमन्तमिव कुर्व्वाणं नभसः पद्मवर्च्चसम् ॥")

सीमन्तोन्नयनसंस्कारः । यथा, याज्ञवल्क्यः । १ । ११ ।

"गर्भाधानमृतौ पुंसःसवनं स्पन्दनात् पुरा ।
षष्ठेऽष्टमे वा सीमन्तः प्रसवे जातकर्म्म च ॥"

( प्रत्यङ्गविशेषः । यथा, सुश्रुते । ३ । ५ ।
"चतुर्द्दशैव सीमन्ताः । ते चास्थिसंघातवद्बर्णनीया यतस्तैर्युक्ता अस्थिसंघाताः । ये ह्युक्ताः संघातास्तु खल्वष्टादशैकेषाम् ॥" )

सीमन्तकं, क्ली, (सीमन्ते कायति शोभते इति । कै + कः । ) सिन्दूरम् । इति राजनिर्घण्टः ॥

सीमन्तकः, पुं, नरकावासः । यथा,—

"लक्ष पञ्चव नरकावासा सीमन्तकादयः ॥"
इति हेमचन्द्रः ॥

सीमन्तिनी, स्त्री, ( सीमन्तोऽस्या अस्तीति । इनिः । ङीप् । ) नारी । इत्यमरः । २।६।२ ॥ ( यथा, रामायणे । २ । ३५ । २१ ।

"मास्म सीमन्तिनी काचित् जनयेत् पुत्त्रमीदृशम् ।
सौमित्रे ! योऽहमम्बाया दद्मि शोकमनन्तकम् ॥" )